# संस्कृत-वार्ता:

**दिनाङ्क :- 14 .03.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री/दिल्ली**

प्रधानमन्त्री नरेन्द्रमोदी अद्य देहल्या: जवाहरलाल नेहरू क्रीडांगणे प्रधानमंत्री स्वनिधि-परियोजनाया: लाभार्थिन: संबोधयिष्यति। कार्यक्रमावधौ प्रधानमन्त्री एकलक्षसंख्यकेभ्य: मार्गवस्तुविक्रेतृभ्य: योजनान्तर्गतम् ऋणं वितरयिष्यति। येषु देहल्या: पञ्चसहस्र-लघु-विक्रतारोऽपि समिलिता: सन्ति। श्रीमोदी दिल्ली मेट्रो इत्यस्य चतुर्थचरणस्यापि आधारशिलां संस्थापयिष्यति।

**प्रधानमन्त्री -सूरज**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: प्रधानमन्त्रि- सामाजिक- उत्थान रोजगार-आधारित- जनकल्याण - पीएम् - सूरज- इत्यस्य राष्ट्रिय पटलस्य अनावरणम् कृतवान् । अपि च, वञ्चितसमुदायानां एक-लक्ष उद्यमिभ्यः ऋण-साहायताम् अनुमोदितवान् । असौ दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन अनुसूचितजाति – निम्नवर्ग-स्वच्छ-कार्यकर्तृन् समेत्य विभिन्नानां सर्वकारीय-योजनानां लाभार्थिभिः सह संवादं विहितवान् । एतस्मिन् कार्यक्रमे देशस्य सप्तत्यधिकचतुश्शतं वंचित- समूहानां विविध- सर्वकारीय- योजनानां प्रायशः त्रि-लक्ष- लाभार्थिनां प्रतिभागिता आसीत्।

**भूटान/प्रधान्मन्त्रियात्रा**

भूटानदेशीय: प्रधानमन्त्री दाशो-त्शेरिंग-तोबगे इत्येष: अद्य आरभ्य भारतस्य पञ्चदिवसीययात्रायां आयाति। अस्य वर्षस्य जनवरीमासे पदभारग्रहणानन्तरं तस्य इयं प्रथमा वैदेशिकीययात्रा वर्तते। विदेशमन्त्रालयेन कथितं यत् स्वीय-यात्रावधौ भूटानदेशीय: प्रधानमन्त्री राष्ट्रपतिना द्रौपदीमुर्म इत्यनया सह मेलनं करिष्यति, प्रधानमन्त्रिणा च नरेन्द्रमोदिना सह द्वैपक्षिकवार्तां विधास्यति। भूटानदेशीय: प्रधानमन्त्री शेरिंग-तोबगे इत्येष: मुम्बईनगरं प्रत्यपि गमिष्यति। मन्त्रालयेन कथितं यत् भारत-भूटान-देशयो: सर्वेषु चरणेषु मैत्रीभाव-समन्वययो: विश्वास-सद्भावनयो: च पारस्परिक-समन्वये अनुकरणीय-सम्बन्धा: सन्ति। भूटानदेशीयस्य प्रधानमन्त्रिण: इयं यात्रा द्वयोरपि देशयो: सम्बन्धान् इतोऽपि सुदृढीकरिष्यति।

**विश्ववृक्कदिवस:**

अद्य विश्ववृक्कदिवसः अस्ति। वृक्कस्वास्थ्यस्य विषये जनानां मध्ये जागरूकतां जनयितुं, प्रतिवर्षं मार्चमासस्य द्वितीयगुरुवासरे एषः दिवसः आचर्यते अस्मिन् वर्षे Kidney Health For All इति विषयः अस्ति। वृक्कः शरीरस्य महत्त्वपूर्णेषु अङ्गेषु अन्यतमः अस्ति तथा च शरीरात् विषाणि दूरीकर्तुं साहाय्यं करोति येन शरीरं सुस्थं स्वस्थं च भवति । आकाशवाणी इत्यनेन सह वार्तालापं कुर्वन् एम्सनवदिल्ली इत्यस्य नेफ्रोलॉजीविभागप्रमुखः डॉ. दीपाङ्करभौमिकः अवदत् यत् वृक्कविकारस्य केचन लक्षणानि पादौ स्थूलता, रक्तचापस्य वृद्धिः, हीमोग्लोबिन इत्यस्य न्यूनता, अस्थीनां दुर्बलताश्च सन्ति। सः जनान् वृक्करोगस्य शीघ्रं ज्ञापनार्थं नियमितरूपेण स्वास्थ्यपरीक्षां कर्तुं परामर्शम् अयच्छत्।

**हरियाणा-प्रशासनं**

हरियाणाराज्यस्य नवचित: मुख्यमन्त्री नायाब-सिंह-सैनी ह्य: विश्वासमतम् विजितवान्। असौ साम्प्रतिके समये राजनीतिक-घटनाक्रमानाम् अनन्तरं एकस्मिन् विशिष्ट-विधानसभा-सत्रावधौ आयोजिते शक्तिपरीक्षणे अद्य विश्वासमतम् समधिगतवान्।

**महिला-प्रीमीयर-लीग**

महिला-क्रिकेट-प्रीमीयर-लीग-इति प्रतिस्पर्धायां ह्य: सायं दिल्ल्या: अरूण-जेटली-क्रिकेट-क्रीडांगणे डेल्ही कैपिटल्सदलं गुजरात जायन्ट्स दलं साम्मुख्यम् अकरोत्, यत्र गुजरात-जाइंट्स इति दलेन स्थापितं सप्तदशोत्तरैकशतधावनांकानां लक्ष्यं देल्ही-केपिटल्स इति दलेने त्रयोदश-कन्दुकक्षेपणचक्रेष्वेव तिस्राणां क्रीडीकानाम् हानौ सम्प्राप्य, विजितम्।

**।। इति वार्ता: ।।**